**CODE- SAN103**

**SANSKRIT SAHITYAM**

## मम्मटोक्तं काव्यप्रयोजनम्

काव्यप्रयोजनविषये संस्कृतज्ञानां नैकं मत्यम्। केचन मम्मटं, केचन विश्वनाथं केचन च भामहं साधिष्ठं मन्यन्ते। तावत् प्रयोजनं विना मन्दस्यापि जनस्य क्वचित् प्रवृत्तिर्न भवति। सर्वो विषय अवगाहित्वेन मम्मटेन प्रतिपादितं काव्यप्रयोजनं साधिष्ठं प्रतिपादयीप्सीतं ग्रन्थघटकीभूतं काव्यस्य प्रयोजनम् अभिधातुमाह-

**काव्यं यशसेऽर्थकृते व्यवहारविधे शिवेतरक्षतये।**

**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।**

काव्यम् अध्ययनश्रवणयोः समन्तरमेव समुपजातः लोकोत्तरः आह्लादः उक्षिप्तर घटः पटः आदि लौकिकनिरसपदार्थः सार्थायापि काव्यं श्रोतव्यं द्रष्टव्यम् मन्तव्यं चेति, सद्यः परेषां निवृत्तिरपि काव्यस्योद्देश्यम्। काव्यं कालिदासादीनामिव यशसो निमित्तं भवति। धावकनामा कविर्यथा श्रीहर्षाख्यभूपतितः निर्माय रत्नावली प्रचुरं धनं प्राप तथा धनप्राप्तिः काव्यस्य फलम्। मयूराख्याय कुष्ठरोगक्रान्ताय कवये तदीयः शतसंख्यकः काव्यश्रवणः परितोषो उपजातः भगवान् भास्करो दिव्यां तनूं ददाविति, तद्वत् शिवेतरक्षतिः काव्यस्य फलम्। अर्थात् हि काव्यं यशसे, अर्थलाभाय, व्यवहारज्ञानाय, अमङ्गलनिवारणाय वा पापविनाशाय, श्रवणेन पठनेन च तत्कालम् अलौकिकस्य आनन्दस्य अनुभवाय, कान्तासंमिततोपदेश-कर्त्तव्याय च परमपयोगि भवति।